MIDNAPORE CITY COLLEGE CENTRAL LIBRARY ESTD 2017



B.A./4th Sem (H)/SNSK/23(CBCS)

# 2023

## 4th Semester Examination

## SANSKRIT (Honours)

MIDNAPORE CITY COLLEGE ESTD 2017 CENTRAL LIBRARY

### Paper : SEC 2-T

Full Marks : 40 Time : Two Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

**[Machine Translation : Tools and Techniques]**

1. पञ्चप्रश्नाः समाधेयाः— 2×5=10

(क) WWW इत्यस्य सम्पूर्णसंज्ञा का ?

(ख) अन्तंर्जालपुस्तकम् (E-BOOK) नाम किम् ?

(ग) संस्कृत-विकिपिडिया (SANSKRIT WIKIPEDIA) नाम किम् ? अस्याः स्रष्टा कः ?

(घ) का नाम स्मृतिः ?

(ङ) UNICODE इत्युक्ते किमुच्यते ?

(च) वैद्युतिकोत्सः (E-SOURCE) इत्यनेन किं बोध्यते ?

(छ) यन्त्राणां चालनविधिः (OPERATING SYSTEM) इत्युक्ते किं ज्ञायते ?

(ज) ग्राफिक्स इत्यस्य कुत्र व्यवहारो भवति ?

P.T.O.

MIDNAPORE CITY COLLEGE CENTRAL LIBRARY ESTD 2017

2. अधोलिखितेषु **चतुर्णां** प्रश्नानामुत्तरं देयम् — 5×4=20

(क) Machine Translation (यान्त्रिकानुवादः) इत्यस्य प्रयोगकौशलानां (Techniques) परिचयो दीयताम्।

(ख) वर्तमाने बहुषु प्रतिष्ठानेषु Machine Translation (यान्त्रिकानुवादः) — इति विषयस्योपरि कार्यं प्रवर्तते। तेषां सामान्यतया उल्लेखः क्रियताम्।

(ग) कतिपयानां श्रव्योपकरणानां नामानि लिखन्तु। एतेषु कस्यचिदेकस्य वैशिष्ट्यं लिखतु।

(घ) Machine Translation (यान्त्रिकानुवादः) इत्यस्य साधनसामग्रीणां (Tools) परिचयः दीयताम्।

(ङ) मानवीयानुवादेन सह (Human Trans) संगणकीयानुवादस्य कः सम्बन्धः? को वा तयोर्भेदः? — स्पष्टयत।

(च) संस्कृतभाषायाः कृते यान्त्रिकानुवादे काः प्रतिवन्धकताः? — आलोच्यताम्।

3. **एकस्य** प्रश्नस्योत्तरं देयम् — 10×1=10

(क) Machine Translation (यान्त्रिकानुवादः) — इति किम्? आधुनिकयुगे तस्य तात्पर्यं किम्?

(ख) Machine Translation (यान्त्रिकानुवादः) — इत्यस्य सीमाबद्धताविषये लघुटिप्पणीं रचयत।

---





MIDNAPORE CITY COLLEGE CENTRAL LIBRARY ESTD 2017

***OR***

**[Evolution of Indian Scripts]**

1. अधोलिखितेषु **पञ्च** प्रश्नाः सुरगिरा देवनागरीलिप्या समाधेयाः। 2×5=10

(क) आदिब्राह्मीवर्णमालायां कति स्वरवर्णाः सन्ति? के च ते?

(ख) लिपिशालासंदर्शनपरिवर्त इति अध्यायः कस्मिन् बौद्धग्रन्थे उपलभ्यते? तत्र कति संख्यकानां लिपीनाम् उल्लेखो वर्तते?

(ग) प्रोटोवेङ्गलि इति अभिधया का लिपिः केन पण्डितेन अभिहिता?

(घ) ब्राह्मीलिपेः पाठोद्धारविषये फिरोज्-शाह-तुघ्लकेन कीदृशो उद्योगः कृतः?

(ङ) आदौ खरोष्ठीलिपिः कैः नामभिः उल्लिख्यन्ते स्म?

(च) कस्मिन् खृष्टवर्षे केन एशियाटिक-सोसाइटि इति प्राच्यविद्याचर्चाकेन्द्रं प्रतिष्ठितम्?

(छ) प्यालिओग्राफि (Palaeography) इति शब्देन किं शास्त्रं बुध्यते?

(ज) केषु जैनग्रन्थेषु प्राचीनभारतवर्षे लिखनकलायाः प्रचलनविषये प्रमाणम् उपलभ्यते?

P.T.O.

MIDNAPORE CITY COLLEGE ESTD 2017 CENTRAL LIBRARY

2. अधोलिखितेषु प्रश्नचतुष्टयं समाधेयम्। 5×4=20

(क) दक्षिणभारतीयवर्णमालायाः वैशिष्ट्यम् आलोचनीयम्।

(ख) शारदालिपेः संभाव्यः कालो लिख्यताम्। केषु देशेषु तस्याः लिपेः अन्तर्भावः ? तस्याः लिपेः वैशिष्ट्यानाम् उल्लेखः कार्यः। 1+1+3

(ग) खरोष्ठीलिपेः पाठोद्धारे केषां पण्डितानाम् अवदानम् आसीत् ? तस्याः लिपेः पाठोद्धारवृत्तं लेखनीयम्। 2+3

(घ) टिप्पणी प्रदेया।

सिद्धमातृका, हरप्पालिपिः 2.5+2.5

(ङ) अक्षरात्मिका लिपिः (Syllabic Script) इति पदेन कीदृशी लिपिः बुध्यते ? ब्राह्मीलिपिः पुर्णतया अक्षरात्मिका न वा इति विचार्यताम्। ग–प इति वर्णद्वयस्य प्राचीनब्राह्म्या आरभ्य उत्तरब्राह्मी यावद् विवर्तनं सचित्रं प्रदर्श्यताम्। 1+2+2

(च) अधोलिखितस्य लेख्यांशस्य खृष्टपूर्वतृतीयशतकगतायाम् आदिब्राह्म्यां लिप्यन्तरं क्रियताम्।

सर्वत विजितम्हि देवानां प्रियस प्रियदसिन राञो एवमपि प्रचंतेसु चोडा पाडा सतियपुतो केतलपुतो आतंबपणी अंतियोकस सामीपा राजानो सर्वत्र देवानंप्रियस प्रियदसिनो राञो द्वे चिकीछा कता मनुसचिकीछा च पसुचिकीछा च।





MIDNAPORE CITY COLLEGE ESTD 2017 CENTRAL LIBRARY

3. अधोलिखितेषु प्रश्नमेकं समाधेयम्। 10×1=10

(क) वैदिकसाहित्ये स्मृतिशास्त्रार्थशास्त्रेषु च भारतवर्षे लिखनकलायाः कीदृशं प्रमाणजातं वर्तते इति समासत आलोच्यताम्।

(ख) उत्तरब्राह्मीलिपेः वैशिष्ट्यानि सोदाहरणं लिख्यन्ताम्।

———

P.T.O.

MIDNAPORE CITY COLLEGE • ESTD 2017 • CENTRAL LIBRARY



*OR*

**[Sanskrit Meter and Music]**

1. अधोलिखितेषु यथेच्छं ***पञ्चानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्। 2×5=10

(क) छन्दः शब्दस्य कोऽर्थः ?

(ख) कति वेदाङ्गानि सन्ति ? वेदपुरुषस्य कस्य अङ्गस्य द्योतकं भवति छन्दः ?

(ग) छन्दःशास्त्रे कति गणाः सन्ति ? के च ते ?

(घ) वैदिकमुख्यच्छन्दसां नामानि लिखत।

(ङ) छन्दःशास्त्रानुसारेण गुरोः लक्षणं किम् ?

(च) सङ्गीतशास्त्रे कति स्वराः सन्ति ? के च ते ?

(छ) गायत्रीछन्दसः कति अक्षराणि सन्ति ? तस्य लक्षणं किम् ?

(ज) छन्दःशास्त्रे कयोश्चित् द्वयोः प्रसिद्धयोः छन्दःशास्त्रकारयोः नाम लिखत।

2. अधोलिखितेषु यथेच्छं ***चतुर्णां*** प्रश्नानामुत्तरं देयम्। 5×4=20

(क) साहित्ये छन्दसः गुरुत्वं किम् ?

(ख) लघुगुरुनिर्णये नियमाः लेखनीयाः।

(ग) यतिविषये टीका कार्या।

(घ) सलक्षणं सोदाहरणं व्याख्या कार्या — वसन्ततिलकम्।





MIDNAPORE CITY COLLEGE • ESTD 2017 • CENTRAL LIBRARY

(ङ) छन्दःशास्त्रे मात्राविषये टिप्पणी कार्या।

(च) मात्रा-गणनिर्देशपूर्वकं छन्दः निर्णीयताम्।

(अ) आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।

(आ) मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।

3. अधोलिखितेषु यथेच्छं ***एकस्य*** प्रश्नस्य उत्तरं देयम्। 10×1=10

(क) संस्कृतशास्त्रे छन्दोविषये कश्चन प्रबन्धः लेख्यः।

(ख) गायत्री, उष्णिक्, अनुष्टुप, बृहती च इत्येषां वैदिकच्छन्दसां लक्षणानि उदाहरणानि च लिख्यन्ताम्।

---